अत्यालः, पुं, (अति अत्याशयेन आ चतुर्द्दिक्षु अलति भूषति अति+आ+अल+कर्त्तरि अच्। लालचिता इतिभाषा) रक्तचित्रकवृक्षः। इति राजनिर्घण्टः॥

अत्याशा, स्त्री, (अतिशयेन आशा) अतिशयाशा। अत्यन्तस्पृहा। असम्भावनीयवाञ्छा। यथा,—
"अत्याशाभिरुपागताध्वगगणान् धन्वावनौ तापिताम्नोयत्तर्पयितुं क्षमोऽस्मि मम तद्दुःखेर्मनो दूयते"। इत्युद्भटः॥

अत्याहारी [न्] त्रि, अतिपूर्व्वाङ्पूर्व्वहृधातोः कर्त्तरि णिन् प्रत्ययनिष्पन्नः। अतिशयाहारकर्त्ता। बह्वाशी। अपरिमितभोजी॥

अत्याहितं, क्ली, (अत्यन्तमाधीयते तन्निवारणाय चित्तं निधीयतेऽत्र अति आ+धा+क्तोऽधिकरणे द्व्यगतिप्रत्यवसानार्थेभ्यश्च इति सूत्रेण क्त अधिकरणे) महाभीतिः। अतिशयभयं। जीवानपेक्षि कर्म्म। जीवनाशारहितसाहसकर्म्म। इत्यमरः॥ (अत्याहितं किमपि राक्षसकर्म्म कुर्य्यात्। इति रामायणं।)

अत्युक्तिः, स्त्री, (अतिशयेन उक्तिः कथनम् अति+वच्+भावे क्तिन्) आरोपितकथनं। अतिशयोक्तिः। असम्भवोक्तिः। अलङ्कारविशेषः। यथा।
"अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्य्यादिवर्णनं।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः"॥
इति चन्द्रालोकः॥

अत्यूहः, पुं, (अतिशयेन ऊहते स्वजनितकेकारवसंकण्ठं यथा तथा शब्दायते यः अति+ऊह+कर्त्तरि अच्। अतिशयितः ऊहस्तर्कः प्रादीति समासः, अतितर्कः) कालकण्ठः। दात्यूहपक्षी। इति मेदिनी॥ अतिशयवितर्कः॥ (अत्यूहा नीलिकायां स्त्री कलकण्ठखगे पुमान्॥ इति मेदिनी॥)

अत्यूहा, स्त्री, (अतिशयितः ऊहः पुष्पोत्कर्षेण तर्को यस्याः सा स्त्रियां टाप्) नीलिका। शेफालिका। इति मेदिनी॥

अत्र, व्य, एतद्+सप्तम्यर्थे त्रल् एतद्शब्दस्य अशादेशः) एतस्मिन्। एखाने इति भाषा। एतच्छब्दस्य सप्तम्याख्यादेशे रूपोऽयं॥ (अपि सन्निहितोऽत्र कुलपतिः॥ इति शाकुन्तले॥)

अत्रभवान्, [त्], त्रि, (एतद्+अन्येभ्योऽपीति प्रथमार्थे त्रल् अत्र अयं भवन् कर्म्मधारयः।) पूज्यः। श्लाघ्यः। मान्यः। नाटकेऽस्य प्रचुरप्रयोगः। इति हेमचन्द्रः॥ (नूनमत्रभवतः शराकृतिं सर्व्वथायमनुयाति सायकः॥ इति भारविः॥)

अत्रिः, पुं, (अत्ति स्म एकगण्डूषेणैव सर्व्वमेव गङ्गाजलं पीतवान् अद्+कर्त्तरि त्रिन् दस्य तः।
"मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः।
ब्रह्मणो मानसाः पुत्त्रा वशिष्ठश्चेति सप्त ते"॥
इति) सप्तर्षिमध्ये ऋषिविशेषः। स च ब्रह्मणश्चक्षुषो जातः। तस्य भार्य्या कर्दममुनिकन्या अनसूया। पुत्त्राः दत्तः १ दुर्व्वासाः २ चन्द्रश्च ३। इति श्रीभागवतं॥ (यथा मनुः,—
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुं।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च"॥)

अत्रिजातः, पुं, (अत्रेर्जात उत्पन्नः पञ्चमीतत्पुरुषः।) चन्द्रः। द्विजन्मा। यथा,—
"अत्रिजातस्य या मूर्त्तिः शशिनः सज्जनस्य च।
क्व सा चैवात्रिजातस्य तमसो दुर्जनस्य च"॥
इति त्रिविक्रमभट्टः॥

अत्रिदृग्जः, पुं, (अत्रेः दृक् चक्षुः षष्ठीतत्पुरुषः तस्या जातः अत्रि दृक्+जन्+ड उपपदसमासः।) चन्द्रः। इति हेमचन्द्रः॥

अत्रिनेत्रजः, (पुं,) चन्द्रः। इति जटाधरः॥

अत्रिनेत्रप्रसूतः, पुं, (अतिनेत्रात् प्रसूतः पञ्चमीतत्पुरुषः) चन्द्रः। इति हलायुधः॥

अत्रिनेत्रभूः, पुं, (अत्रिनेत्रात् भवति यः अत्रिनेत्र+भू+कर्त्तरि क्विप्) चन्द्रः। इति त्रिकाण्डशेषः॥

अत्रिभारद्वाजिका, स्त्री, अत्रिश्च भरद्वाजश्च द्वन्द्वः तयोः स्त्रीपुंसयोर्म्मैथुनात् जाता अत्रि भरद्वाज+"द्वन्द्वाद्वुन् वैरमैथुनयोरिति" वुन् तस्य अकः स्त्रियां टाप्) अत्रिभारद्वाजी विवाहः। इति शब्दरत्नावली॥

अथ, व्य, (अर्थ+ड पृषोदरादित्वात् रस्य लोपः।) मङ्गलं। अनन्तरं। आरम्भः। प्रश्नः। कार्त्स्न्यं। इत्यमरः॥ अधिकारः। संशयः। विकल्पः। समुच्चयः। इति मेदिनी॥ (अथ तस्य विवाहकौतकं ललितं बिभ्रत एव पार्थिवः॥ इति रघुवंशे॥)

अथकिं (अर्थं पूर्व्वोक्तं वाक्यं कवते स्वीकरोति अर्थ+कु+डिम् पृषोदरादित्वात् वस्य लोपः। अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यमरः।) व्य, स्वीकारः। इति शब्दरत्नावली॥

अथर्व्व [न्] क्ली, (अथ लोकमङ्गलाय अर्व्वते प्रसूयते यत् अथ+अर्व्व+कर्म्मणि अनिप् शकन्ध्वादित्वात् पररूपं। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ इत्यमरः) वेदविशेषः। इति मेदिनी॥ तत्तु चतुर्थवेदः नवशाखायुक्तः। अस्य विवरणं वेदशब्दे द्रष्टव्यं॥

अथर्व्वणः, पुं, (अथर्व्व विद्यतेऽस्य न प्रत्ययः।) शिवः। इति त्रिकाण्डशेषः॥

अथर्व्वणिः, पुं, (अथर्व्ववेदं नयति ज्ञानविषयं प्रापयति अथर्व्वन्+नी+कर्त्तरि क्विप्। पृषोदरादित्वात् ह्रस्वः) अथर्व्ववेदज्ञब्राह्मणः। पुरोहितः। इति मेदिनी॥

अथर्व्वा [न्] पुं, (अथ लोकमङ्गलाय अर्व्वति वेदविशेषं प्रस्तौति अथ+अर्व्व+अनिप् शकन्ध्वादित्वात् पररूपं) ब्राह्मणः। इति मेदिनी॥ (कृतपदपंक्तिरथर्व्वणेव वेदः॥ इति भारविः)॥

अथो, व्य, (अर्थ+डो पृषोदरादित्वात् रलोपः) मङ्गलं। आनन्तर्य्यं। समुच्चयः। प्रश्नः। आरम्भः। कार्त्स्न्यं। अधिकारः। संशयः। विकल्पः। इति मेदिनी॥
("स्त्रियो रत्नान्यथो विद्या धर्म्मः शौचं सुभाषितं।
विविधानि च शिल्पानि समादेयानि सर्व्वतः"॥
इति मनुः॥)

अद इ बन्धे। (भ्वादि परस्मैपदी सेट् इदित्) इति कविकल्पद्रुमः॥ इ अन्द्यते। इति दुर्गादासः॥

अद ल औ भक्षणे (अनिट् परस्मैपदी अदादि।) इति कविकल्पद्रुमः॥ ल अत्ति। औ अत्ता। गणकृतमनित्यमिति न्यायात् शपःस्थितौ अदतीत्यपीति वररुचिः। इति दुर्गादासः॥

अदः [स्] त्रि, (न दस्यते अङ्गु इदन्तया अङ्गुलिरुत्क्षिप्यते यत्र न+दस्+बाहुल्यात् क्विप् त्रिलिङ्गत्वञ्च।) एतत्। पुरोवर्त्ति। एइ इति भाषा। परं। परोक्षभूतं। इति मेदिनी। सेइ इति भाषा।

अदत्तं, त्रि, (न दत्तम् उत्सृष्टं नञ्समासः नञत्र अप्राशस्त्ये यथा कारिकायां।
"तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"॥
इति।) अन्यायेन दत्तं। यथा। यत् पुनरन्यायेन दत्तं तददत्तं। षोड़शप्रकारमपि प्रत्याहर्त्तव्यमेव इत्यर्थादुक्तं भवति। नारदेन च। दत्तं सप्तविधं प्रोक्तमदत्तं षोड़शात्मकमिति प्रतिपाद्य दत्तादत्तयोः स्वरूपं विवृतं।
"अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः॥
बालमूढ़ास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितं।
कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत्॥
अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते।
यद्दत्तं स्यादविज्ञानाददत्तमिति तत् स्मृतमिति॥
अयमर्थः। भयेन वन्दिग्राहादिभ्यो दत्तं। क्रोधेन पुत्त्रादिवैरनिर्य्यातनायान्यस्मै दत्तं। पुत्त्रवियोगादिनिमित्तशोकाविष्टेन दत्तं। उत्कोचेन कार्य्यप्रतिबन्धनिरासार्थमधिकृतेभ्यो दत्तं। परिहासेनोपहासेन दत्तं। एकः स्वद्रव्यमन्यस्मै ददात्यन्योऽपि तस्मै ददातीति दानव्यत्यासः। छलयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य ददाति। बालेनाप्राप्तषोड़शवर्षेण। मूढ़ेन लोकवेदानभिज्ञेन। अस्वतन्त्रेण पुत्त्रदासादिना। आर्त्तेन रोगाभिभूतेन मत्तेन मदनीयप्रमत्तेन। उन्मत्तेन वातिकाद्युन्मादयुक्तेन। अपवर्जितं दत्तं। तथायं मदीयमिदं कर्म्म करिष्यतीति प्रतिलाभेच्छया दत्तं। अचतुर्वेदाय चतुर्वेदोऽहमित्युक्तवते दत्तं। यज्ञं करिष्यामीति धनं लब्ध्वा द्यूतादौ विनियुञ्जानाय दत्तमित्येवं षोड़शप्रकारमपि दत्तमदत्तमित्युच्यते। प्रत्याहरणीयत्वात्। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयं।
"सुस्थेनार्त्तेन वा दत्तं श्रावितं धर्म्मकारणात्।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः॥
इति कात्यायनस्मरणात्। यः पुनः षोड़शप्रकारमप्यदत्तं गृह्णाति यश्चादेयं प्रयच्छति। तयोर्दण्डो नारदेनोक्तः।
"गृह्णात्यदत्तं यो लोभात् यश्चादेयं प्रयच्छति।
अदेयदायको दण्ड्यस्तथा दत्तप्रतीच्छकः"॥
इति मिताक्षरा॥ कन्यकानां त्वदत्तानां। इति कात्यायनः॥